01C

# S-III/6/2228B/21

**षष्ठसत्रार्द्धम्**

**षष्ठपत्रम्**

**नव्यन्यायः**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वचिन्तामणिकारः कः?
2. सिषाधयिषाविरहविशिष्टत्वं विशेषणं कुत्र?
3. सिषाधयिषाविरहविशिष्टसिद्ध्यनुमानातिरिक्तसाधकमानयोरन्यतरस्याभावः इति कस्य मते कस्य लक्षणम्?
4. यत्प्रत्यक्षादितत्सामग्रीसमवहिता येच्छा तदन्यत्वं किम्?
5. सिद्धिभेदविशिष्टं यत्प्रत्यक्षसामग्रीभिन्नं तदन्यत्वं किम्?
6. एकत्रजनकत्वप्रतिबन्धकत्वयोः विरोधादित्यस्य कोऽर्थः?
7. विशिष्टबुद्धिसामान्यं प्रति कारणं किम्?
8. सार्वभौमपक्षतालक्षणे प्रथमक्षणपदं किमर्थम्?
9. सार्वभौमपक्षतायाः लक्षणे सिद्धौ किं विशेषणम्?
10. पक्षतालक्षणे द्वितीयक्षणपदं किमर्थम्?
11. उपमानादेरित्यत्र आदिपदेन कस्य परिग्रहः?

**अथवा**

साधकमानं तत्सामग्री इत्युक्ते को दोषः?

12. पक्षतायाः लक्षणे अनुमितिपदं किमर्थम्?

**अथवा**

सिद्ध्यभावः पक्षता इत्युच्यते को दोषः?

13. यत्तुमते अनुमितिं प्रति का प्रतिबन्धिका?

**अथवा**

पक्षतालक्षणे उत्पत्तिपदाभावे को दोषः?

14. तदुपहितत्वं साधकमानमित्युक्ते को दोषः?

**अथवा**

पक्षतालक्षणे अव्यवहितोत्तरत्वं कुत्र विशेषणम्?

15. अनवरतमित्यस्य कोऽर्थः?

**अथवा**

निवर्तकत्वं किम्?

(5×6=30)

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।**

16. अव्यवहितोत्तरत्वलक्षणे स्वसमयध्वंसाधिकरणत्वं किमर्थमिति विचारयत।

17. सार्वभौमपक्षतालक्षणे प्रथमसिषाधयिषाविरहविशिष्टत्वस्य प्रयोजनमुपपादयत।

18. सार्वभौमपक्षतालक्षणे द्वितीयसिषाधयिषाविशिष्टत्वं किमर्थमिति विचारयत।

**अथवा**

कारणमात्रस्यैव कार्यसहभावेन हेतुत्वमिति प्रभाकरमतं प्रतिपादयत।

19. अनुमित्साकालीनान्यत्वमेव सामग्रीविशेषणं कुतो नेति विविच्यताम्।

**अथवा**

सोदाहरणपूर्वकं ध्वंसलक्षणं प्रतिपादयत।

20. सार्वभौमपक्षतालक्षणे उत्पत्तिपदस्य प्रयोजनमुपपादयत।

**अथवा**

स्वाधीतग्रन्थदिशा क्षणत्वं विचारयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. ग्रन्थोक्तदिशा अव्यवहितोत्तरत्वं परिष्कुरुत।

**अथवा**

केचित्तुमते सिद्धिपदस्य सार्थक्यमुपपाद्य तन्निरस्यताम्।

**अथवा**

अव्यवहितोत्तरत्वलक्षणे कालपदस्य प्रयोजनमुपपादयत।